National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(58): 217-218
© 2025 NJHSR
www.sanskritarticle.com

**सिमरन रवीन्द्र ठाकुर**
साहायकप्राध्यापिका, व्याकरणविभागः,
कविकुलगुरुकालिदाससंस्कृतविश्व-
विद्यालयः, रामटेकम्

**Correspondence:**
**सिमरन रवीन्द्र ठाकुर**
साहायकप्राध्यापिका, व्याकरणविभागः,
कविकुलगुरुकालिदाससंस्कृतविश्व-
विद्यालयः, रामटेकम्

# संस्कृतभाषायाः मराठीभाषायाश्च तुलनात्मकम् अध्ययनम्

**सिमरन रवीन्द्र ठाकुर**

**शोधपत्रसारः**

**भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।**
**तत्रापि काव्यं मधुरं तस्मादपि सुभाषितम्॥**

श्रुतिपथमागतमिदं काव्यवचनं नूनमेव संस्कृतभाषायाः महत्त्वं सन्दर्शयति। यद्यपि पृथिव्यां सर्वेषु देशेषु भिन्नेषु राज्येषु नानाभाषाः प्रयुञ्जते जनः। भारतीयासु भाषासु वैविध्यं तु प्रचुरमेव दृश्यते। भारतदेशे बह्व्यः भाषाः प्रयुज्यन्ते यथा – हिन्दी, मराठी, कन्नडा, मल्याळम इत्यादि। एतासां समासामेव भाषाणाम् अस्ति स्वस्थाने कश्चिद्विशेषः। किन्तु भाषाणां जननी इति संस्कृतभाषा प्रसिद्धा। एवं सत्यपि अन्याः भाषाः स्वस्थाने भजन्त्येवापूर्वत्वम्। परम्मस्माभिः सदैव श्रूयते संस्कृतस्यैव व्याकरणस्य माहात्म्यं श्रूयते।

इह शोधपत्रे तावत् संस्कृतस्य मराठीभाषायाश्च मिथः वर्तमानान् **काञ्चन भेदान्** उपस्थापयामि। मराठीभाषायाः व्याकरणमपि उत्तमं योग्यं चास्ति। किन्तु उभयत्र भाषयोः अस्ति कश्चिद् विशेषः। तमादायेह स्वल्पं तुलनात्मकम् अध्ययनम् आकार्यते।

**शोधपद्धतिः**

इह मया तुलनात्मकमध्ययनपद्धतिः आदृता।

**सङ्केतशब्दाः**

मराठीव्याकरणम्, संस्कृतव्याकरणम्, वेदाः, छन्दः, वेदाङ्गत्वम्।

**विषयः**

सर्वस्या अपि भाषायाः व्याकरणं बहुत्र नियमान् उपस्थापयति। किन्तु संस्कृतव्याकरणस्य अस्ति कश्चिद्विशेषः अन्याभ्यः भाषाभ्यः। यतो हि व्याकरणमिदं वेदाङ्गं विद्यते। श्रूयते हि -

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोथ पठ्यते**
**ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।**
**विद्या घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं**
**तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**[1]

अतः व्याकरणं प्रवृत्तम् इदं केवलस्य वेदस्य कृते एव अस्ति। यद्यपि **केषां शब्दानाम्? लौकिकानां वैदिकानां च।**[2] इत्युक्तम् अथापि वेदस्य इह प्राधान्यमिति न विस्मर्तव्यम्। इह भाष्यकारेण महर्षिणा पतञ्जलिना उक्तं यद् **रक्षोहागमलघ्वसन्देहाः प्रयोजनम्**[3] इति। **रक्षार्थं वेदानाम् अध्येयं व्याकरणम्**[4] इति पस्पशायां प्रतिज्ञातम्। वेदाः कदापि भाषाभेदं विषयभेदं वा नैव जनयन्ति। तत्र प्रोक्तः नाम ऋषिभिरुक्तः विषयः वैदिकः इति अस्माभिस्थैवाङ्गीक्रियते। व्याकरणस्य वेदाङ्गत्वे हि नूनमेव तस्यापि छान्दस्त्वं सुतरां सिद्धमेव। अतः इह प्रोक्ता नियमाः कदापि भेदान् ज प्रतिपादयन्ति। महर्षिणा पाणिनिना समुपदिष्टे अष्टाध्यायीनामाख्ये ग्रन्थे यः नियमक्रमः प्रदत्तः स सार्वत्रिकः सन् सर्वोपयोगी अस्ति।

संस्कृतभाषायाः अन्यः विशेषः नाम अस्याः भाषायाः व्याकरणस्य एकत्र स्थितिकत्वात् अस्या भाषाया अन्या काप्यपरा भाषा (dilect) न विद्यते। अतः अस्याः व्याकरणं वैशिष्ट्यं भजते। अन्यासु भाषासु तु न तथा। अन्या भाषास्तु प्रतियोजनं भिद्यन्ते इति श्रूयते। कथं वा तासां व्याकरणस्य एकत्र स्थितिः भवितुम् अर्हति इत्येवं संस्कृतव्याकरणं स्वमाहात्म्यं सम्प्रदर्शयत्येव।

मराठीभाषायाः व्याकरणं यदि पश्यामः तर्हि तत्र उभयथा शब्दप्रवृत्तिः दृश्यते – तद्भवशब्दः तत्समशब्दश्च। संस्कृतात् यथावत् स्वीकृताः तत्समशब्दाः तदितरे तु तद्भवशब्दाः। इह मराठ्यां यदि पश्यामः तर्हि बहुत्र भेदः द्रष्टुं शक्यः। यथा – यदन्तः शब्दः संस्कृते भवति तदन्त एव स समासेऽपि भवति। किन्तु मराठ्यां न तथा। यथा – *कविकुलगुरु* इति शब्दे कवि, कुल, गुरु इति शब्दत्रयम्। अयं शब्दः संस्कृते समस्तः अस्ति। तत्र कविगुरुशब्दौ ह्रस्वौ वर्तेते तौ तथैव च भवतः समासेऽपि। किन्तु मराठ्यां तावत् कवी, गुरू इति प्रातिपदिके स्तः। समासवेलायां तु कविशब्दः ह्रस्वः भवति अन्तिमः गुरुशब्दः तु दीर्घ एव तिष्ठति। एवञ्च संस्कृते दीर्घस्य ह्रस्वं कर्तुं कश्चिद् नियमः कथितः यश्च सर्वत्र आदृतः भवति। किन्तु नात्र मराठ्यां तथा यतो हि प्रतिप्रदेशं मराठी भिद्यते। एवं तर्हि दुष्टं यः उच्चारयति शुद्धं च यः उच्चारति उभावपि तुल्यावेव भवतः। किन्तु इह संस्कृते तु भाष्यकारेण उभयथा उच्चारणे फलभेदः दर्शितः। साधूच्चारयिता धर्मं लभते तद्विरुद्धस्तु अधर्मम् इति। यत्र भाषा एव प्रतियोजनं भिद्यते तत्र नियमः क्लिष्टकरः भवितुम् अर्हति। किञ्च अन्यासु भाषासु वाक्यरचनायाः नियमाः सन्ति। न तथा संस्कृते। यथा – रामः ग्रामं गच्छति इत्यस्य यः अर्थः स एव गच्छति ग्रामं रामः इत्यस्यापि। किन्तु मराठ्यां तावत् – राम फळ खातो इत्यस्य व्युत्क्रमे तु फळ राम खातो इत्यर्थे फलेन रामः खाद्यते इति विपरीतबोधापत्तिः। किन्तु अयं व्युत्क्रमः एवशब्देन संस्कृते अपि अर्थभेदं जनयति। तद्यथा – अहं भोजनम् एव करोमि इत्यत्र एवशब्दस्य अन्यस्थानकत्वे अहम् एव भोजनं करोमि/ अहं भोजनं करोमि एव इति उभयत्रापि अर्थभेदापत्तिः। इत्येवं उभयत्र भाषयोः स्वस्थले वैशिष्ट्यं किञ्चिदस्त्येव।

**फलम्**

इह संस्कृतभाषा वेदाश्रिता पाणिनिना सुनिबद्धा इति न कदापि सा स्थित्यन्तरं प्राप्नोति। किन्तु मराठ्यां यथा व्यवहारभेदवशाद् भाषाभेदः प्रवृत्तः सः न कथञ्चिद् हानिं जनयति। तद्व्याकरणं कदाचित् मर्यादितं स्यात् किन्तु भाषायाः भिन्नस्थितिकत्वमपि जनानां मनस्सु सम्यगेव आदरस्थानं भजते इति अपूर्वता अस्या भाषायाः। संस्कृते हि व्याकरणं शास्त्रम् अतः तत्र नियमाः आवस्क्यका एव ते च नूनमेव पाणिनिना प्रोक्ताः। किञ्च इत्थं भाषा प्रयुक्ता सा साध्वी प्रामाणिकी च इति यदि कथनं बहूनां विदुषां मतमादाय प्रयोगमादाय च क्रियते। अतः इह भाषाविषये विशिष्टः नियमः अथवा एकस्या अपेक्षया अन्यस्याः बलवत्त्वम् इति सर्वः श्रमः न योग्यतामेति इति मे मतम्।

**संदर्भ ग्रंथ:**

[1] पाणिनीयशिक्षा – ४१,४२

[2] महाभाष्यम् – पस्पशाह्निकम्

[3] महाभाष्यम् – पस्पशाह्निकम्

[4] महाभाष्यम् – पस्पशाह्निकम्